# Vishnukrita Shiva Stuti

# વિષ્ણુકૃતશિવસ્તુતિઃ

## Document Information

Text title : Vishnukrita Shiva Stuti

File name : viShNukRRitashivastutiH.itx

Category : shiva, vIrashaiva, stuti

Location : doc_shiva

Proofread by : Manish Gavkar

Description/comments : with Marathi meaning

Latest update : January 20, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 20, 2023

*sanskritdocuments.org*

# વિષ્ણુકૃતશિવસ્તુતિઃ

વિષ્ણુરુવાચ ।
પ્રસીદ ભગવન્મહ્યમહઙ્કારરતાત્મને ।
ત્વયિ વિસ્મૃતચિત્તાય નિર્વીર્યાયાલ્પચક્ષુષે ॥ ૩૦॥

પ્રસીદ જન્મમરણજરાશોકોર્મિસઙ્કુલે ।
અગાધે ભવસિન્ધૌ મે પતિતસ્ય મહેશ્વર ॥ ૩૧॥

રાગદ્વેષમદક્રોધલોભમોહમહાગ્રહૈઃ ।
પ્રસીદ મે ગૃહીતસ્ય સર્વસર્વેશ્વરામલ ॥ ૩૨॥

પ્રસીદ ક્ષાન્તવિક્ષેપાક્ષિમાંવાચિત્ત શઙ્કર ।
ત્ર્યક્ષાદ્ય ચાક્ષિજાતાશુશુક્ષણિક્ષપિતાઙ્ગજ ॥ ૩૩॥

પ્રસીદ સિતસંસિક્તભસિતાલિપ્તવિગ્રહ ।
સસિતાઙ્ગાસિતગ્રીવ સુસિતોક્ષગતિપ્રિય ॥ ૩૪॥

પ્રસીદામ્બાલતાલિઙ્ગિતાભીષ્ટસુરભૂરુહ ।
અમ્બાકરરુહાગ્રાત્ત લેખાભૂષણભૂષિત ॥ ૩૫॥

પ્રસીદ મે મહાકાલ કાલકોમલકન્ધર ।
આલીજનપ્રિયાલીલ માયાલમ્બિતવિગ્રહ ॥ ૩૬॥

પ્રસીદાપિઙ્ગદીર્ઘાન્તજટાવિવૃતપશ્ચિમ ।
પિઙ્ગાક્ષાક્ષર યક્ષેષ્ટ માઙ્ગલ્યાલય માધવ ॥ ૩૭॥

પ્રસીદામ્બાલોચનાબ્જપ્રબોધકરભાસ્કર ।
ગઙ્ગાભૂષણ ચન્દ્રાર્ધખણ્ડમણ્ડિતમસ્તક ॥ ૩૮॥

પ્રસીદ યોગિધ્યેયાદ્યજ્ઞાનરૂપમહેશ્વર ।
મહામહિમ માયાવિન્ મહાદેવ મહેશ્વર ॥ ૩૯॥

નમસ્તે કોટિસૂર્યાભતેજસે ભુવનેશ્વર ।

બ્રહ્માદિદેવસઙ્ગીતપુણ્યકીર્તે પ્રજાર્ચિત ॥ ૪૦॥

તરુણાદિત્યસઙ્કાશ કરુણાકર શઙ્કર ।
શરણં ભવ મે ભો ત્વં મરણાર્તિ વિનાશન ॥ ૪૧॥

પરમેશ્વર પદ્માક્ષ પુરશાસન પૂરુષ ।
નમસ્તે નાકનાથાર્ચિતાઙ્ઘ્રિપઙ્કજ કેશવ ॥ ૪૨॥

નમો હિરણ્યકેશાય શોચિષ્કેશાય ધીમતે ।
નમસ્તે શિપિવિષ્ટાય પૃશ્નિગર્ભાય મન્યવે ॥ ૪૩॥

ઉમાકુચાગ્રસમ્મર્દકુઙ્કુમારુણવક્ષસે ।
સુવર્ણાયાદિદેવાય દેવગર્ભાય વેધસે ॥ ૪૪॥

સુદ્યુમ્નાયાદિકવયે બ્રહ્મગર્ભાય મન્યવે ।
સુશુચે ભ્રાજસે દેવ નમસ્તે તિગ્મ રોચિષે ॥ ૪૫॥

ભૂતનાથાય કાલાય સૃષ્ટિસંહારકારિણે ।
સુવર્મને વિશુદ્ધાય કૃષ્ણાયામિતતેજસે ॥ ૪૬॥

નમઃ શિવાય રુદ્રાય નીલકણ્ઠાય ભૂયસે ।
દિગમ્બરાય સામ્બાય ત્ર્યમ્બકાયાદિચક્રિણે ॥ ૪૭॥

નમો વામાય ઘોરાય સદ્યાય પુરુષાય ચ ।
ઈશાનાય ચ શાન્તાય શાશ્વતાયાન્તકારિણે ॥ ૪૮॥

ભક્તાર્તિભેદિને ભુક્તિમુક્તિદાયાદિવેદિને ।
વેદવેદ્યાદ્યવિદ્યાય ધરામાયાવિનોદિને ॥ ૪૯॥

માઙ્ગલ્યદાયિને નિત્યં માઙ્ગલ્યાય ત્રિશૂલિને ।
નિરાશિષે નમસ્તુભ્યમાશિષાં પતયે નમઃ ॥ ૫૦॥

ધર્માય ભક્તવર્માય સર્વકર્મૈકસાક્ષિણે ।
નમસ્તે નરસિંહારે નરકારે નરેશ્વર ॥ ૫૧॥

પઞ્ચપઞ્ચ કનિષ્પઞ્ચ સચરાચરપઞ્ચક ।
ખેચરાચારરહિત દુરાચારાપહારિણે ॥ ૫૨॥

સર્વજ્ઞાય વિશિષ્ટાય સર્વાભિષ્ટુતકર્મણે ।
સર્વસાર નમસ્તેઽસ્તુ સર્વેશ્વર સદાશિવ ॥ ૫૩॥

સર્વાધાર મહાયોગિન્ યોગગમ્ય પુરુષ્ટુત ।
યોગાધાર નિરાધાર ધરાધર નમોઽસ્તુ તે ॥ ૫૪॥

અનાથાય વિનાથાય નાથનાથાય શૂલિને ।
નમોઽસ્ત્વનાથનાથાય સોમનાથાય શમ્ભવે ॥ ૫૫॥

નમસ્તે બ્રહ્મકેશાય વિષ્ણુનેત્રાય શોચિષે ।
સૂર્યોદરાય રુદ્રાય રુક્મિણે સોમચેતસે ॥ ૫૬॥

સૂક્ષ્મજ્ઞાનકુઠારાય વરેણ્યાયાદિમૂર્તયે ।
નમસ્તે ભૂતચાપાય શાન્તાય વિષયેષવે ॥ ૫૭॥

નમસ્તે લોકમાલાય ગ્રહાકલ્પાય મુણ્ડિને ।
નમસ્તે દણ્ડ્યદણ્ડાય શક્તિશૂલકપાલિને ॥ ૫૮॥

નમઃ શેષકલાપાય માયાશિષ્ટાય માયિને ।
મહેશ્વરાય મહતે વિશ્વનાથાય વિષ્ણવે ॥ ૫૯॥

સર્વાર્ચિતાય શર્વાય સર્વાયામૃતમૂર્તયે ।
નમસ્તુભ્યં નમસ્તુભ્યં નમસ્તુભ્યં સદાશિવ ॥ ૬૦॥

યદજ્ઞાનાત્કૃતં સર્વં ક્ષમસ્વ મમ શઙ્કર ।
મા ભૂદેવમિતઃ પશ્ચાદહઙ્કારાવૃતં મનઃ ॥ ૬૧॥

ત્વત્પ્રસાદાન્મહેશાન સર્વાવસ્થાસુ સર્વદા ।
ચરણામ્બુજયોસ્તેઽસ્તુ મનો મે જન્મજન્મનિ ॥ ૬૨॥

કરુણાકર કારુણ્યં કુરુ મે શરણાર્થિનઃ ।
અણુ વાનણુ વા દેવ જ્ઞાનતોઽજ્ઞાનતોઽપિ વા ॥ ૬૩॥

યત્કૃતં મનસા વાચા કર્મણા ચ મયા શિવ ।
ભક્તોઽયમિતિ મામીક્ષ્ય સુપ્રસન્નેન ચક્ષુષા ।
તત્સર્વં મમ વિશ્વેશ ક્ષમસ્વોમાહૃતાહૃત ॥ ૬૪॥

ઇતિ સ્તુતઃ સ ભગવાન્ વિષ્ણુના પ્રભવિષ્ણુના ।
આહ ગમ્ભીરયા વાચા ભક્ત્યા તુષ્ટો મહેશ્વરઃ ॥ ૬૫॥

ઇતિ શ્રીમન્નીલકણ્ઠનાગનાથાચાર્યવર્યવિરચિતે શ્રીમદ્વીરમાહેશ્વરાચારસઙ્ગ્રહે
વિષ્ણુકૃતશિવસ્તુતિઃ સમાપ્તા ।

(૩૦) વિષ્ણુ મ્હણાલા- હે પરમેશ્વરા, તૂં મજવર કૃપા કર. મી ગર્વાનેં અતિશય ફુગલોં ત્યામુળે મલા તુઝી આઠવણ દેખીલ રાહિલી નાહીં; માઝ્યા અંગાત કાંહીચ સામર્થ્ય નાહીં. મી ફાર ક્ષુલ્લક દૃષ્ટીચા આહેં.
(૩૧) મી સંસારસમુદ્રાંત પડલોં આહેં હ્યા સમુદ્રાંત જન્મ, મરણ, મ્હાતારપણ દુઃખ વગૈરે લાટા ઉસળત અસૂન હ્યા સમુદ્રાચા અંત લાગત નાહીં. હ્યા સમુદ્રાંત મી બુડત આહેં તર હ્યાંતૂન તૂં કૃપા કરૂન મલા વર કાઢ.
(૩૨) વિષયસુખ, વૈર, અહંકાર, રાગ, આશા આણિ અજ્ઞાન હ્યા સુસરીંનીં મલા ગિળૂન ટાકિલેં આહે, હ્યાંપાસૂન માઝી મુક્તતા કર. તૂં સર્વ પ્રાણિમાત્રાંચા અધિપતિ આહેસ, તુલા શર્વ મ્હણતાત, તુઝ્યા અંગી કોણતાહી દોષ નાહીં.
(૩૩) તૂં ભક્તજનાંચે અપરાધ ક્ષમા કરિતોસ, પરમેશ્વરા, તુજવર પાર્વતીચેં મન ફાર આસક્ત આહે, તુલા શંકર મ્હણતાત, તુલા તીન નેત્ર આહેત, ત્યાંપૈકી તિસરા કપાળાવરીલ નેત્ર સર્વાંત શ્રેષ્ઠ આહે. ત્યા નેત્રાંતીલ અગ્નીનેં તૂં મદનાસ જાળૂન ટાકિલેંસ, તૂં મજવર કૃપા કર.
(૩૪) પરમેશ્વરા, તૂં આપલે અંગાસ પાંઢરેં શુભ્ર ભસ્મ લાવિલે આહેસ ત્યામુળે તુઝે અંગ પહિલ્યાપેક્ષા ફારચ પાંઢરેં દિસતેં. તુઝેં સ્વરૂપ ગોરેં અસૂન તુઝા ગળા નીલરંગાચા આહે, તુલા શુભ્ર વૃષભાવર પ્રયાણ કરણ્યાચી ફાર આવડ આહે, તૂં મજવર કૃપા કર.
(૩૫) તુઝ્યા શરીરાલા પાર્વતી દેવીનેં પ્રેમાનેં દોન્હી હાતાનેં આલિંગન દિલેં આહે, તૂં ભક્તાંચે મનોરથ પૂર્ણ કરણારા પ્રત્યક્ષ કલ્પવૃક્ષ આહેસ. પાર્વતીચ્યા હાતાચ્યા નખાંચે વણ તુઝ્યા અંગાવર ઉમટલે અસલ્યામુળે તે અલંકાર ઘાતલ્યાસારખે દિસતાત, તૂં મજ્વર કૃપા કર.
(૩૬) પરમેશ્વરા, તૂં મજવર કૃપા કર. તુલા મહાકાલ મ્હણતાત, તુઝા ગળા નિળ્યા રંગાચા અસૂન તો ફાર નાજૂક આહે. પરમેશ્વરા, પાર્વતીચ્યા મૈત્રિણી તિચ્યાજવળ અસતાં ત્યાંચ્યાસમક્ષ તૂં પાર્વતીબરોબર ક્રીડા કરિતોસ; તુઝ્યા શરીરાલા માયાદેવી (પાર્વતી) નેહમીં ચિકટલેલી આહે.
(૩૭) પરમેશ્વરા, તૂં મજવર કૃપા કર. તુઝ્યા મસ્તકાવરીલ જટા પિંગટ રંગાચ્યા અસૂન ત્યા ફાર લાંબ આહેત, વ ત્યા જટાંચે ટોંક પશ્ચિમ દિશેકડે વળલેલે આહે. તુઝે ડોળે પિંગટ રંગાચે અસૂન તૂં અવિનાશી આહેસ; તુલા યક્ષલોક ફાર આવડતાત, તૂં મંગલકારક વસ્તૂંચી ખાણ આહેસ. તૂં લક્ષ્મીચા પતિ આહેસ.
(૩૮) પરમેશ્વરા, તૂં મજવર કૃપા કર. પરમેશ્વરા, પાર્વતીચ્યા નેત્રરૂપ કમલાંસ તૂં સૂર્યાસારખા આનંદ દેતોસ, તૂં આપલે મસ્તકાવર અલંકારાસારખી ગંગા ધારણ કેલી આહેસ, તુઝ્યા મસ્તકાવર અર્ધચંદ્ર આહે.
(૩૯) પરમેશ્વરા તૂં મજવર કૃપા કર, યોગીશ્વર લોક તુઝેં નેહમીં ધ્યાન કરિતાત, તૂં સર્વ ત્રૈલોક્યાચા મૂલપુરુષ આહેસ, તૂં જ્ઞાનસ્વરૂપ આહેસ, તુલા મહેશ્વર અસેં મ્હણતાત, તુઝી કીર્તિ ફાર મોઠી આહે, તુઝ્યાબરોબર માયા અસતે મ્હણૂન તુલા માયી મ્હણતાત, માયેચેં ખરેં સ્વરૂપ તુલા કળૂન ચુકલેં આહે, તૂં મહાદેવ આહેસ, તૂં મહેશ્વર આહેસ
(૪૦) એક કોટિ સૂર્યાંચ્યા તેજાસારખેં તુઝેં રૂપ તેજસ્વી આહે, તૂં ત્રૈલોક્યાચા અધિપતિ આહેસ, બ્રહ્માદિક દેવ તુઝી કીર્તિ મોઠ્યા આવડીનેં ગાતાત. તુઝી કીર્તિ ફાર પવિત્ર આહે, સર્વ પ્રજા તુઝી પૂજા કરિતાત. તુલા નમસ્કાર અસો.

(૪૧) દોન પ્રહરચ્યા વેળચ્યા સૂર્યાસારખેં તુઝેં સ્વરૂપ તેજસ્વી આહે, તૂં મોઠા દયાળુ આહેસ, તૂં કલ્યાણ કરણારા આહેસ. પરમેશ્વરા, તૂં માઝેં રક્ષણ કર. તૂં મરણાચેં દુઃખ નાહીંસેં કરણારા આહેસ.
(૪૨) તુલા પરમેશ્વર મ્હણતાત, તુઝે ડોળે કમળાંસારખે આહેત, તૂં ત્રિપુરાંસ શિક્ષા કેલીસ તૂં સર્વાંચા મૂલપુરુષ આહેસ, તુઝ્યા પદકમલાંચી દેવેંદ્ર દેખીલ પૂજા કરિતો, તુલા કેશવ અસેંહી મ્હણતાત, તુલા નમસ્કાર અસો.
(૪૩) તુલા હિરણ્યકેશ (સોન્યાસારખે લાલ રંગાચે કેસ અસણારા), શોચિષ્કેશ, ધીમાન્, શિપિવિષ્ટ, પૃશ્નિગર્ભ અશીં નાંવેં આહેત, ત્યા તુલા નમસ્કાર અસો.
(૪૪) પાર્વતીચે સ્તનાવરીલ કુંકુ લાગૂન તુઝા ઊર લાલ ઝાલા આહે તુઝા વર્ણ ફાર ચાંગલા આહે, તૂંચ મૂલદેવ આહેસ, તૂં સર્વ દેવાચેં મૂલસ્થાન આહેસ, તૂંચ બ્રહ્મદેવ આહેસ તુલા નમસ્કાર અસો.
(૪૫) તુલા સુદ્યુમ્ન, આદિકવિ, બ્રહ્મગર્ભ, મન્યુ, સુશુચા, ભ્રાજા, દેવ, તિગ્મરોચિ અશીં નાંવેં આહેત, ત્યા તુલા નમસ્કાર અસો.
(૪૬) તૂં પ્રાણિમાત્રાંચા અધિપતિ આહેસ, તુલા કાલ મ્હણતાત, તૂંચ જગ ઉત્પન્ન કરિતોસ. આણિ તૂંચ જગાચા સંહાર કરિતોસ. તુલા સુવર્ત્મા, વિશુદ્ધ, કૃષ્ણ આણિ અમિતતેજા અશીં નાંવેં આહેત, ત્યા તુલા નમસ્કાર અસો.
(૪૭) તુલા શિવ, રુદ્ર, નીલકંઠ; ભૂયસ્, દિગંબર, સાંબ, ત્ર્યંબક, આણિ આદિચક્રી, અશી નાંવેં આહેત, ત્યા તુલા નમસ્કાર અસો.
(૪૮) તુલા વામ, ઘોર, સદ્ય, પુરૂષ, ઈશાન, શાંત, શાશ્વત, અનંતકારિ અશી અનેક નાંવેં આહેત, ત્યા તુલા નમસ્કાર અસો.
(૪૯) તૂં ભક્તલોકાંચી દુઃખે દૂર કરિતોસ, આણિ ભક્તાંસ હ્યા લોકીચી આણિ પરલોકીચી સુખેં (મુક્તિ) મિળવૂન દેતોસ, તૂં મૂલજ્ઞાની આહેસ, તૂ વેદાંચ્યા દ્વારાને જાણાવયાસારખા આહેસ, તૂંચ મૂલવિદ્યા આહેસ, તૂં ધરા આણિ માયા હ્યાંચી કરમણૂક કરણારા આહેસ, તુલા નમસ્કાર અસો.
(૫૦) તૂં આપલ્યા ભક્તાંચે કલ્યાણ કરિતોસ, તૂં નેહમીં કલ્યાણસ્વરૂપ આહેસ, તુઝ્યા હાતાંત ત્રિશૂલ આહે, તૂં નિરિચ્છ આહેસ, તૂં સર્વ આશીર્વાદાંચા અધિપતિ આહેસ તુલા નમસ્કાર અસો, તુલા નમસ્કાર અસો.
(૫૧) તૂં ધર્મસ્વરૂપ આહેસ, તૂં ભક્તાંચ્યા અંગાતીલ ચિલખત આહેસ, પ્રત્યેક પ્રાણિમાત્ર જીં જીં બરીં વાઈટ કામેં કરિતાત તીં તીં સર્વ તુલા માહીત આહેત; તૂં નરસિંહાચા શત્રુ આહેસ, તૂં દુર્ગતીચા શત્રુ આહેસ, આણિ તૂં સર્વ મનુષ્યાંચા રાજા આહેસ, તુલા નમસ્કાર અસો.
(૫૨) તૂં પંચવીસ તત્ત્વસ્વરૂપ આહેસ, તુલા પંચમહાભૂતાંચા સંબંધ નાહીં, તૂં સ્થાવર જંગમ પ્રાણ્યાંચા વિસ્તાર કરણારા આહેસ, આકાશાંત ફિરણાૅ્યા પ્રાણ્યાંચે ગુણધર્મ તુઝ્યાંત નાહીત, તૂં દુરાચારાચા નાશ કરિતોસ, ત્યા તુલા નમસ્કાર અસો.
(૫૩) તૂં સર્વજ્ઞ આહેસ, તૂં સર્વાંહૂન શ્રેષ્ઠ આહેસ, સર્વ લોક તુઝ્યા કૃત્યાચી ફાર પ્રશંસા કરિતાત ઇતકીં તુઝીં કૃત્યેં ચાંગલી આહેત, તૂ સર્વ વસ્તૂંત સારભૂત (મહત્વાચી) વસ્તુ આહેસ, તૂં સર્વાંચા અધિપતિ આહેસ, તુલા સદાશિવ અસેં મ્હણતાત, અશા તુલા નમસ્કાર અસો.
(૫૪) તૂ સર્વ પ્રાણિમાત્રાંસ આધાર આહેસ, તૂં મોઠા યોગીશ્વર આહેસ, તુઝેં સ્વરૂપ યોગાંચ્યા સાધનાનેં સમજતેં, તુલા પુરુષ્રુત મ્હણતાત, તૂં યોગાસ આધાર દેણારા આહેસ, તુલા આધાર દેણારા દુસરા કોણી નાહીં, તૂં પૃથ્વીલા

આધારભૂત આહેસ, ત્યા તુલા નમસ્કાર અસો.

(૫૫) તુઝા કોણી ધની નાહીં, તુલા વિનાથ (ધની નસણારા) અસેં મ્હણતાત, ત્રૈલોક્યાંત જે મુખ્ય મુખ્ય અધિકારી આહેત ત્યાંચા તૂં મુખ્ય અધિકારી આહેસ, તુઝ્યા હાતાંત શૂલ આહે, તૂં અનાથ (દીન) લોકાંચા અધિપતિ (રક્ષણ કરણારા) આહેસ, તુલા સોમનાથ મ્હણતાત, તુલા શંભુ મ્હણતાત ત્યા તુલા નમસ્કાર અસો.

(૫૬) તુલા બ્રહ્મકેશ, વિષ્ણુનેત્ર, શોચિષ્, સૂર્યોદર, રુદ્ર, રુક્મી, સોમચેતાઃ અશીં નાંવેં આહેત, ત્યા તુલા નમસ્કાર અસો.

(૫૭) તુઝી જ્ઞાનરૂપ કુન્હાડ ફાર તીક્ષ્ણ આહે (તૂં મોઠા જ્ઞાની આહેસ), તૂં સર્વોપેક્ષાં શ્રેષ્ઠ આહેસ, તૂં મૂલપુરુષ આહેસ, પંચમહાભૂત હે તુઝેં ધનુષ્ય અસૂન ઇંદ્રિયગોચર વિષય હે તુઝે બાણ આહેત; તુઝા સ્વભાવ ફાર શાંત આહે ત્યા તુલા નમસ્કાર અસો.

(૫૮) હે સાત લોક તુઝ્યા માલા આહેત, નઊ ગ્રહ હે તુઝે અલંકાર આહેત, તૂં આપલ્યા ગળ્યાંત મનુષ્યાચ્યા મસ્તકાચ્યા માલા ઘાલિતોસ. તૂં અપરાધી લોકાંસ શિક્ષા કરિતોસ, શક્તિ, શૂલ આણિ કપાલ હે તિન્હીહી પદાર્થ તૂં આપલ્યા હાતાંત ઘેતોસ, ત્યા તુલા નમસ્કાર અસો.

(૫૯) તૂં આપલ્યા અંગાવર શેષનાગ અલંકારા સારખા ઘેતોસ, તૂં માયેપેક્ષાં ફાર શ્રેષ્ઠ આહેસ, તુલા માયી મ્હણતાત, તુલા મહેશ્વર મ્હણતાત, તૂં શ્રેષ્ઠ (મોઠા) આહેસ, તૂં ત્રૈલોક્યાચા અધિપતિ આહેસ, તુલા વિષ્ણુ મ્હણતાત, ત્યા તુલા નમસ્કાર અસો.

(૬૦) સર્વ પ્રાણિમાત્ર તુઝી પૂજા કરિતાત, તુલા શર્વ મ્હણતાત તર્સેચ સર્વ અસેંહી મ્હણતાત તૂં અમૃતસ્વરૂપ આહેસ; હે સદાશિવા, ત્યા તુલા નમસ્કાર અસો, નમસ્કાર અસો, નમસ્કાર અસો.

(૬૧) શ્રીશંકરા, માઝ્યા હાતૂન અજ્ઞાનપણામુળે આજપર્યંત જે કાંહીં અપરાધ ઝાલે અસતીલ, ત્યા સર્વાંચી તૂં મલા ક્ષમા કર. આણિ આતાપાસૂન પુઢેં કેવ્હાંહી માઝેં મન પુનઃ ગર્વિષ્ઠ હોઊં નયે, અસા વર દે.

(૬૨) હે મહેશ્વરા, મી કોણત્યાહી સ્થિતીંત અસો, જન્મોજન્મીં માઝેં મન તુઝ્યા કૃપાદૃષ્ટીનેં નેહમીં તુઝ્યા પદકમલાંચીચ ભક્તિ કરો, દુસરેં કાંહીં નકો.

(૬૩) તૂ મોઠા દયાળૂ મનાચા આહેસ, મી તુલા શરણ આલો આહેં, તૂં મજવર કૃપા હે પરમેશ્વરા, માઝે હાતૂન લહાન અસો કિંવા મોઠેં અસો, સમજૂન અસો કિંવા નસમજૂન અસો.

(૬૪) જે કાંહીં મનાનેં વાચેનેં આણિ કૃતીનેં બરેં વાઈટ કૃત્ય ઝાલે અસેલ ત્યા સર્વાંચી હા માઝા ભક્ત આહે અશી કલ્પના કરૂન તૂં કૃપાદૃષ્ટીનેં મલા ક્ષમા કર. તૂં વિશ્વાચા અધિપતિ આહેસ, પરમેશ્વરા, તુલા પાર્વતીનેં વશ કેલેં આહે, આણિ વશ કેલેં નાહીં, અશી સ્થિતિ આહે.

(૬૫) હ્યા પ્રમાણેં જયશીલ શ્રી વિષ્ણૂનેં ભગવાન્ શ્રી શિવાચી સ્તુતિ કેલ્યાવર ત્યાચ્યા ભક્તીમુળે પ્રસન્ન હોઊન શ્રી શંકર ત્યાસ ગંભીર શબ્દાનેં મ્હણાલે

(૬૬) શ્રીશિવ મ્હણાલે- વિષ્ણો, તુઝ્યા હાતૂન હજારો હજાર અપરાધ ઝાલે અસલે તરી તુઝ્યા ભક્તીમુળેં આણિ તૂં કેલેલ્યા માઝ્યા સ્તોત્રામુળે મી આતાં તુલા તે સર્વ ક્ષમા કેલે આહેત.

Proofread by Manish Gavkar

*Vishnukrita Shiva Stuti*

pdf was typeset on January 20, 2023

Please send corrections to *sanskrit@cheerful.com*